Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

B-3
3

॥ श्रीः ॥

चौखम्भा राजसेवा ग्रन्थमाला
३८

अथ दकारादि-
दुर्गासहस्रनामस्तोत्रम्

(दकारादि-दुर्गासहस्रनामावलिसहितम्)

सम्पादकः
वेदाचार्यः पं० उमेशकुमारशर्मा गौडः

चौखम्भा ओरियन्टालिया
वाराणसी दिल्ली

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

॥ श्रीः ॥

चौखम्भा राजसेवा ग्रन्थमाला

३८

अथ

दकारादि-दुर्गासहस्रनामस्तोत्रम्

(दकारादि-दुर्गासहस्रनामावलिसहितम्)

सम्पादकः

वेदाचार्यः पं० उमेशकुमारशर्मा गौडः

चौखम्भा ओरियन्टालिया

वाराणसी दिल्ली

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

प्रकाशक

चौखम्भा ओरियन्टालिया

पो० आ० चौखम्भा, पो० बा० नं० ३२

गोकुल भवन, के० ३७/१०९, गोपाल मन्दिर लेन

वाराणसी–२२१००१ (भारत)

टेलीफोन : ५२९३९ टेलीग्राम : गोकुलोत्सव

शाखा—बंगलो रोड, ९ यू० बी० जवाहर नगर

दिल्ली–११०००७

© चौखम्भा ओरियन्टालिया

प्रथम संस्करण १९७८

मूल्य रु० १–००

मुद्रक—श्रीगोकुल मुद्रणालय, गोपाल मन्दिर लेन, वाराणसी

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दो शब्द

शास्त्रों में जगज्जननी दुर्गा का विशेष महत्त्व कहा गया है। दुर्गा की शक्ति अद्भुत और प्रत्यक्ष है। दुर्गाकी सन्तुष्टता के लिये दुर्गासप्तशति, दुर्गासहस्रनाम-स्तोत्र और दुर्गासहस्रनामावली आदि का प्रतिदिन पाठ करने का विधान है। दुर्गा के उपासकों के लिये दकारादि दुर्गासहस्रनामस्तोत्र और दकारादिदुर्गा-सहस्रनामावली को प्रकाशित किया जा रहा है। इन दोनों के प्रतिदिन पाठ करने से मनुष्य को सुख-शान्ति की प्राप्ति होती है और दुःख-दारिद्र्य दूर होता है। आशा है, दुर्गा माता के भक्तगण प्रतिदिन दकारादिदुर्गासहस्रनामस्तोत्र और दकारादिदुर्गासहस्रनामावली का पाठ कर अपना इहलोक और परलोक बनावेंगे।

भैरवाष्टमी
सं० २०३५

उमेशकुमार शर्मा गौड
वेदप्राध्यापक
शास्त्रार्थ महाविद्यालय, वाराणसी

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः ।
पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

॥ श्रीदुर्गादेव्यै नमः ॥

अथ दकारादि-दुर्गासहस्रनामस्तोत्रम्

(दकारादि-दुर्गासहस्रनामावलिसहितम्)

अस्य श्रीदकारादि-दुर्गासहस्रनामस्तोत्रस्य शिवऋषिः अनुष्टुप् छदः श्रीदुर्गा-देवता दुँ बीजं दुँ कीलकं दुःख-दारिद्र्य-रोगशोकनिवृत्तिपूर्वकं श्रीदुर्गादेवीप्रीत्यर्थं च (एभिर्नामभिरमुक-पुष्पाक्षतसमर्पणे) पाठे हवने च विनियोगः ।

दुंदुर्गा दुर्गतिहरा दुर्गाचल - निवासिनी ।
दुर्गमार्गानुसञ्चारा दुर्गमार्ग - निवासिनी ॥ १ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दुर्गमार्ग - प्रविष्टा च दुर्गमार्ग - प्रवेशिनी ।
दुर्गमार्ग - कृतावासा दुर्गमार्ग - जयप्रिया ॥ २ ॥
दुर्गमार्गगृहीतार्चा दुर्गमार्ग - स्थितात्मिका ।
दुर्गमार्गस्तुतिपरा दुर्गमार्गस्मृतिः परा ॥ ३ ॥
दुर्गमार्गसंदास्थाली दुर्गमार्गरति - प्रिया ।
दुर्गमार्ग-स्थलस्थाना दुर्गमार्ग-विलासिनी ॥ ४ ॥
दुर्गमार्गत्यक्त-वस्त्रा दुर्गमार्ग - प्रवर्तिनी ।
दुर्गासुर-निहन्त्री च दुर्गा दुष्ट - निषूदिनी ॥ ५ ॥
दुर्गासुरहरा - दूती दुर्गासुर - विनाशिनी ।
दुर्गासुर - वधोन्मत्ता दुर्गासुरवधोत्सुका ॥ ६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दुर्गासुर - वधोत्साहा दुर्गासुर - वधोद्यता ।
दुर्गासुरवधप्रेप्सुर्दुर्गासुरमखान्तकृत् ॥ ७ ॥
दुर्गासुरध्वंसतोषा दुर्गदानवदारिणी ।
दुर्गविद्रावणकरी दुर्गविद्रावणी सदा ॥ ८ ॥
दुर्गविक्षोभणकरी दुर्गशीर्षनिकृन्तनी ।
दुर्गविध्वंसनकरी दुर्गदैत्यनिकृन्तनी ॥ ९ ॥
दुर्गदैत्य - प्राणहरा दुर्गदैत्यान्तकारिणी ।
दुर्गदैत्य - हरत्राता दुर्गदैत्या - सृगुन्मदा ॥ १० ॥
दुर्गदैत्याशनकरी दुर्गचर्माम्बरावृता ।
दुर्गयुद्धोत्सवकरी दुर्गयुद्ध - विशारदा ॥ ११ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दुर्गयुद्धासवरता दुर्गयुद्ध - विमर्दिनी ।
दुर्गयुद्ध - हास्यरता दुर्गयुद्धाट्टहासिनी ॥ १२ ॥
दुर्गयुद्ध - महामत्ता दुर्गयुद्धानुसारिणी ।
दुर्गयुद्धोत्सवोत्साहा दुर्गदेशनिषेविणी ॥ १३ ॥
दुर्गदेशवासरता दुर्गदेश - विलासिनी ।
दुर्गदेशार्चनरता दुर्गदेशजनप्रिया ॥ १४ ॥
दुर्गमस्थानसंस्थाना दुर्गमध्यानुसाधना ।
दुर्गमा दुर्गमध्याना दुर्गमात्मस्वरूपिणी ॥ १५ ॥
दुर्गमागम - सन्धाना दुर्गमागमसंस्तुता ।
दुर्गमागम - दुर्ज्ञेया दुर्गम - श्रुतिसंमता ॥ १६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दुर्गमश्रुतिमान्या च दुर्गमश्रुति - पूजिता ।
दुर्गमश्रुतिसुप्रीता दुर्गमश्रुति - हर्षदा ॥ १७ ॥
दुर्गमश्रुतिसंस्थाना दुर्गमश्रुतिमानिता ।
दुर्गमाचार - सन्तुष्टा दुर्गमाचारतोषिता ॥ १८ ॥
दुर्गमाचार - निर्वृत्ता दुर्गमाचारपूजिता ।
दुर्गमाचारकलिता दुर्गमस्थानदायिनी ॥ १९ ॥
दुर्गमप्रेमनिरता दुर्गमद्रविणप्रदा ।
दुर्गमाम्बुजमध्यस्था दुर्गमाम्बुजवासिनी ॥ २० ॥
दुर्गनाडीमार्गगतिर्दुर्गनाडीप्रचारिणी ।
दुर्गनाडीपद्मरता दुर्गनाड्यम्बुजस्थिता ॥ २१ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दुर्गनाडीगतायाता दुर्गनाडीकृतास्पदा ।
दुर्गनाडीरतरता दुर्गनाडीश - संस्तुता ॥ २२ ॥
दुर्गनाडीश्वररता दुर्गनाडीशचुम्बिता ।
दुर्गनाडीशक्रोडस्था दुर्गनाड्युत्थितोत्सुका ॥ २३ ॥
दुर्गनाड्यारोहणा च दुर्गनाडीनिषेविता ।
दरिस्थाना दरिस्थान-वासिनी दनुजान्तकृत् ॥ २४ ॥
दरीकृत - तपस्या च दरीकृत - हरार्चना ।
दरीजापितदिष्टा च दरीकृत - रतिक्रिया ॥ २५ ॥
दरीकृतहरार्हा च दरीक्रीडितपुत्रिका ।
दरीसन्दर्शनरता दरीरोपित - [illegible]शिका ॥ २६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दरीगुप्तिकौतुकाढ्या दरीभ्रमण - तत्परा ।
दनुजान्तकरी दीना दनुसन्तान - दारिणी ॥ २७ ॥
दनुजध्वंसिनी दूना दनुजेन्द्रविनाशिनी ।
दानध्वंसिनी देवी दानवानां भयङ्करी ॥ २८ ॥
दानवी दानवाराध्या दानवेन्द्र-वर-प्रदा ।
दानवेन्द्र-निहन्त्री च दानवद्वेषिणी सती ॥ २९ ॥
दानवारि - प्रेमरता दानवारि - प्रपूजिता ।
दानवारिकृतार्चा च दानवारि - विभूतिदा ॥ ३० ॥
दानवारि-महानन्दा दानवारि-रति-प्रिया ।
दानवारि - दानरता दानवारि - कृतास्पदा ॥ ३१ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दानवारि-स्तुतिरता दानवारि-स्मृतिप्रिया ।
दानवार्याहाररता दानवारि - प्रबोधिनी ॥ ३२ ॥
दानवारिधृतप्रेमा दुःखशोक - विमोचिनी ।
दुःखहन्त्री दुःखदात्री दुःखनिर्मूलकारिणी ॥ ३३ ॥
दुःखनिर्मूलनकरी दुःखदार्यरिनाशिनी ।
दुःखहरा दुःखनाशा दुःखग्रामा दुरासदा ॥ ३४ ॥
दुःखहीना दुःखधारा द्रविणाचारदायिनी ।
द्रविणोत्सर्गसन्तुष्टा द्रविणत्यागतोषिका ॥ ३५ ॥
द्रविण-स्पर्श-सन्तुष्टा द्रविण-स्पर्श-मानदा ।
द्रविणस्पर्शहर्षाढ्या द्रविणस्पर्शतुष्टिदा ॥ ३६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

द्रविण - स्पर्शनकरी द्रविणस्पर्शनातुरा ।
द्रविणस्पर्शनोत्साहा द्रविणस्पर्शसाधिका ॥ ३७ ॥
द्रविण - स्पर्शनमता द्रविण - स्पर्शपुत्रिका ।
द्रविणस्पर्शरक्षिणी द्रविणस्तोमदायिनी ॥ ३८ ॥
द्रविणकर्षणकरी द्रविणौघ - विसर्जनी ।
द्रविणाचलदानाढ्या द्रविणाचलवासिनी ॥ ३९ ॥
दीनमाता दीनबन्धुर्दीनविघ्नविनाशिनी ।
दीनसेव्या दीनसिद्धा दीनसाध्या दिगम्बरी ॥ ४० ॥
दीनगेहकृतानन्दा दीनगेह - विलासिनी ।
दीनभाव - प्रेमरता दीनभाव - विनोदिनी ॥ ४१ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दीनमानव-चेतःस्था दीनमानव-हर्षदा ।
दीनदैन्यनिघातेच्छुर्दीनद्रविण - दायिनी ॥ ४२ ॥
दीनसाधन - सन्तुष्टा दीनदर्शनदायिनी ।
दीनपुत्रादिदात्री च दीनसम्पद्विधायिनी ॥ ४३ ॥
दत्तात्रेयध्यानरता दत्तात्रेयप्रपूजिता ।
दत्तात्रेयर्षिसंसिद्धा दत्तात्रेयविभाविता ॥ ४४ ॥
दत्तात्रेयकृतार्हा च दत्तात्रेयप्रसाधिता ।
दत्तात्रेयहर्षदात्री दत्तात्रेयसुखप्रदा ॥ ४५ ॥
दत्तात्रेयस्तुता चैव दत्तात्रेयनुता सदा ।
दत्तात्रेयप्रेमरता दत्तात्रेयानुमानिता ॥ ४६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दत्तात्रेयसमुद्गीता दत्तात्रेयकुटुम्बिनी ।
दत्तात्रेयप्राणतुल्या दत्तात्रेयशरीरिणी ॥ ४७ ॥
दत्तात्रेयकृतानन्दा दत्तात्रेयांशसम्भवा ।
दत्तात्रेयविभूतिस्था दत्तात्रेयानुसारिणी ॥ ४८ ॥
दत्तात्रेयगीतिरता दत्तात्रेयधनप्रदा ।
दत्तात्रेयदुःखहरा दत्तात्रेयवरप्रदा ॥ ४९ ॥
दत्तात्रेय - ज्ञानदात्री दत्तात्रेयभयापहा ।
देवकन्या देवमान्या देवदुःखविनाशिनी ॥ ५० ॥
देवसिद्धा देवपूज्या देवेज्या देववन्दिता ।
देवमान्या देवधन्या देवविघ्न - विनाशिनी ॥ ५१ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

देवरम्या देवरता देवकौतुकतत्परा ।
देवक्रीडा देवव्रीडा देववैरिविनाशिनी ॥ ५२ ॥
देवकामा देवरामा देवद्विष्टविनाशिनी ।
देवदेवप्रिया देवी देवदानव - वन्दिता ॥ ५३ ॥
देवदेवरतानन्दा देवदेव - वरोत्सुका ।
देवदेवप्रेमरता देवदेवप्रियंवदा ॥ ५४ ॥
देवदेवप्राणतुल्या देवदेवनितम्बिनी ।
देवदेवहृतमना देवदेवसुखावहा ॥ ५५ ॥
देवदेवक्रोडरता देवदेवसुखप्रदा ।
देवदेवमहानन्दा देवदेवप्रचुम्बिता ॥ ५६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

देवदेवोपभुक्ता च देवदेवानुसेविता ।
देवदेवगतप्राणा देवदेवगतात्मिका ॥ ५७ ॥
देवदेवहर्षदात्री देवदेवसुखप्रदा ।
देवदेवमहानन्दा देवदेवविलासिनी ॥ ५८ ॥
देवदेवधर्मपत्नी देवदेवमनोगता ।
देवदेववधूर्देवी देवदेवार्चनप्रिया ॥ ५९ ॥
देवदेवाङ्कनिलया देवदेवाङ्गशायिनी ।
देवदेवाङ्गसुखिनी देवदेवाङ्गवासिनी ॥ ६० ॥
देवदेवाङ्गभूषा च देवदेवाङ्गभूषणा ।
देवदेवप्रियकरी देवदेवाप्रियान्तकृत् ॥ ६१ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

देवदेवप्रियप्राणा देवदेवप्रियात्मिका ।
देवदेवार्चकप्राणा देवदेवार्चकप्रिया ॥ ६२ ॥
देवदेवार्चकोत्साहा देवदेवार्चकाश्रया ।
देवदेवार्चकाविघ्ना देवदेवप्रसूरपि ॥ ६३ ॥
देवदेवस्य जननी देवदेवविधायिनी ।
देवदेवस्य रमणी देवदेवहृदाश्रया ॥ ६४ ॥
देवदेवेष्ट - देवी च देवतापसपातिनी ।
देवताभावसन्तुष्टा देवताभावतोषिता ॥ ६५ ॥
देवताभाववरदा देवताभावसिद्धिदा ।
देवताभावसंसिद्धा देवताभावसम्भवा ॥ ६६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

देवताभावसुखिनी देवताभाववन्दिता ।
देवताभावसुप्रीता देवताभावहर्षदा ॥ ६७ ॥
देवताविघ्नहन्त्री च देवताद्विष्टनाशिनी ।
देवतापूजितपदा देवताप्रेमतोषिता ॥ ६८ ॥
देवतागारनिलया देवतासौख्यदायिनी ।
देवतानिजभावा च देवताहृतमानसा ॥ ६९ ॥
देवताकृतपादार्चा देवताहृतभक्तिका ।
देवतागर्वमध्यस्था देवतादेवतातनुः ॥ ७० ॥
दुं दुर्गायै नमो नाम्नी दुंफण्मन्त्रस्वरूपिणी ।
दुं नमो मन्त्ररूपा च दुं नमो मूर्तिकात्मिका ॥ ७१ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दूरदर्शिप्रिया दुष्टा दुष्टभूतनिषेविता ।
दूरदर्शिप्रेमरता दूरदर्शिप्रियंवदा ॥ ७२ ॥
दूरदर्शिसिद्धिदात्री दूरदर्शिप्रतोषिता ।
दूरदर्शिकण्ठसंस्था दूरदर्शिप्रहर्षिता ॥ ७३ ॥
दूरदर्शिगृहीतार्चा दूरदर्शिप्रतर्पिता ।
दूरदर्शिप्राणतुल्या दूरदर्शिसुखप्रदा ॥ ७४ ॥
दूरदर्शिभ्रान्तिहरा दूरदर्शिहृदास्पदा ।
दूरदर्श्यरिविद्भावा दीर्घदर्शिप्रमोदिनी ॥ ७५ ॥
दीर्घदर्शिप्राणतुल्या दूरदर्शिवरप्रदा ।
दीर्घदर्शिहर्षदात्री दीर्घदर्शिप्रहर्षिता ॥ ७६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दीर्घदर्शिमहानन्दा दीर्घदर्शिगृहालया ।
दीर्घदर्शिगृहीतार्चा दीर्घदर्शिहृतार्हणा ॥ ७७ ॥
दया दानवती दात्री दयालुर्दीनवत्सला ।
दयार्द्रा च दयाशीला दयाढ्या च दयात्मिका ॥ ७८ ॥
दयादानवती दात्री दयालुर्दीनवत्सला ।
दयार्द्रा च दयाशीला दयाढ्या च दयात्मिका ॥ ७९ ॥
दयाम्बुधिर्दयासारा दयासागरपारगा ।
दयासिन्धुर्दयाभारा दयावत्करुणाकरी ॥ ८० ॥
दयावद्वत्सला देवी दयादानरता सदा ।
दयावद्भक्तिसुखिनी दयावत्परितोषिता ॥ ८१ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दयावत्स्नेहनिरता दयावत्प्रतिपादिका ।
दयावत्प्राणकर्त्री च दयावन्मुक्तिदायिनी ॥ ८२ ॥
दयावद्भावसन्तुष्टा दयावत्परितोषिता ।
दयावत्तारणपरा दयावत्सिद्धिदायिनी ॥ ८३ ॥
दयावत्पुत्रवद्भावा दयावत्पुत्ररूपिणी ।
दयावद्देहनिलया दयाबन्धुर्दयाश्रया ॥ ८४ ॥
दयालुवात्सल्यकरी दयालुसिद्धिदायिनी ।
दयालुशरणाशक्ता दयालुर्देहमन्दिरा ॥ ८५ ॥
दयालुभक्तिभावस्था दयालुप्राणरूपिणी ।
दयालुसुखदा दम्भा दयालुप्रेमवर्षिणी ॥ ८६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दयालुवशगा दीर्घा दीर्घाङ्गी दीर्घलोचना ।
दीर्घनेत्रा दीर्घचक्षुर्दीर्घबाहुलतात्मिका ॥ ८७ ॥
दीर्घकेशी दीर्घमुखी दीर्घघोणा च दारुणा ।
दारुणासुरहन्त्री च दारुणासुरदारिणी ॥ ८८ ॥
दारुणाहवकर्त्री च दारुणाहवहर्षिता ।
दारुणाहवहोमाढ्या दारुणाचलनाशिनी ॥ ८९ ॥
दारुणाचारनिरता दारुणोत्सवहर्षिता ।
दारुणोद्यतरूपा च दारुणारिनिवारिणी ॥ ९० ॥
दारुणेक्षणसंयुक्ता दोश्चतुष्कविराजिता ।
दशदोष्का दशभुजा दशबाहुविराजिता ॥ ९१ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दशास्त्रधारिणी देवी दशदिक्ख्यातविक्रमा ।
दशरथार्चितपदा दाशरथिप्रिया सदा ॥ ९२ ॥
दाशरथिप्रेमतुष्टा दाशरथिरतिप्रिया ।
दाशरथिप्रियकरी दाशरथिप्रियंवदा ॥ ९३ ॥
दाशरथीष्टसन्दात्री दाशरथीष्टदेवता ।
दाशरथिद्वेषिनाशा दाशरथ्यानुकूल्यदा ॥ ९४ ॥
दाशरथिप्रियतमा दाशरथिप्रपूजिता ।
दशाननारिसम्पूज्या दशाननारिदेवता ॥ ९५ ॥
दशाननारिप्रमदा दशाननारिजन्मभूः ।
दशाननारिरतिदा दशाननारिसेविता ॥ ९६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दशाननारिसुखदा दशाननारिवैरिहृत् ।
दशाननारीष्टदेवी दशग्रीवारिवन्दिता ॥ ९७ ॥
दशग्रीवारि - जननी दशग्रीवारिभाविनी ।
दशग्रीवारिसहिता दशग्रीवसभाजिता ॥ ९८ ॥
दशग्रीवारिरमणी दशग्रीववधूरपि ।
दशग्रीवनाशकर्त्री दशग्रीववरप्रदा ॥ ९९ ॥
दशग्रीवपुरस्या च दशग्रीववधोत्सुका ।
दशग्रीवप्रीतिदात्री दशग्रीवविनाशिनी ॥ १०० ॥
दशग्रीवाहवकरी दशग्रीवानपायिनी ।
दशग्रीवप्रिया वन्द्या दशग्रीवहृता तथा ॥ १०१ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi. Muthulakshmi Research Academy. Funded by IKS, MoE

दशग्रीवाहितकरी दशग्रीवेश्वर - प्रिया ।
दशग्रीवेश्वरप्राणा दशग्रीववरप्रदा ॥ १०२ ॥
दशग्रीवेश्वररता दशवर्षीयकन्यका ।
दशवर्षीयबाला च दशवर्षीयवासिनी ॥ १०३ ॥
दशपापहरा दम्या दशहस्तविभूषिता ।
दशशस्त्रलसद्दोष्का दशदिक्पालवन्दिता ॥ १०४ ॥
दशावताररूपा च दशावताररूपिणी ।
दशविद्याभिन्नदेवी दशप्राणस्वरूपिणी ॥ १०५ ॥
दशविद्यास्वरूपा च दशविद्यामयी तथा ।
दृक्स्वरूपा दृक्प्रदात्री दृग्रूपा दृक्प्रकाशिनी ॥ १०६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दिगन्तरा दिगन्तस्था दिगम्बरविलासिनी ।
दिगम्बरसमाजस्था दिगम्बरप्रपूजिता ॥ १०७ ॥
दिगम्बरसहचरी दिगम्बरकृतास्पदा ।
दिगम्बरहृताचित्ता दिगम्बरकथाप्रिया ॥ १०८ ॥
दिगम्बर - गुणरता दिगम्बर - स्वरूपिणी ।
दिगम्बर - शिरोधार्या दिगम्बरहृताश्रया ॥ १०९ ॥
दिगम्बर - प्रेमरता दिगम्बर - रतातुरा ।
दिगम्बरीस्वरूपा च दिगम्बरीगणार्चिता ॥ ११० ॥
दिगम्बरीगणप्राणा दिगम्बरीगणप्रिया ।
दिगम्बरीगणाराध्या दिगम्बरगणेश्वरा ॥ १११ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दिगम्बरगणस्पर्शा मदिरामानविह्वला ।
दिगम्बरीकोटिवृता दिगम्बरीगणावृता ॥ ११२ ॥
दुरन्ता दुष्कृतिहरा दुर्ध्येया दुरतिक्रमा ।
दुरन्तदानवद्वेष्टी दुरन्तदनुजान्तकृत् ॥ ११३ ॥
दुरन्तपापहन्त्री च दस्रनिस्तारकारिणी ।
दस्रमानससंस्थाना दस्रज्ञानविवर्धिनी ॥ ११४ ॥
दस्रसम्भोगजननी दस्रसम्भोगदायिनी ।
दस्रसम्भोगभवना दस्रविद्याविधायिनी ॥ ११५ ॥
दस्रोद्वेगहरा दस्र - जननी दस्रसुन्दरी ।
दस्रभक्तिविधाज्ञाना दस्रद्विष्टविनाशिनी ॥ ११६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Digitized by Muthulakshmi Research Academy. Funded by IKS, MoE

दस्रापकारदमनी दस्रसिद्धिविधायिनी ।
दस्रताराराधिका च दस्रमातृप्रपूजिता ॥ ११७ ॥
दस्रदैन्यहरा चैव दस्रतातनिषेविता ।
दस्रपितृशयज्योतिर्दस्रकौशलदायिनी ॥ ११८ ॥
दशशीर्षारिसहिता दशशीर्षारिकामिनी ।
दशशीर्षपुरी देवी दशशीर्षसभाजिता ॥ ११९ ॥
दशशीर्षारिसुप्रीता दशशीर्षवधूप्रिया ।
दशशीर्षशिरश्छेत्री दशशीर्षनितम्बिनी ॥ १२० ॥
दशशीर्षहरप्राणा दशशीर्षहरात्मिका ।
दशशीर्षहराराध्या दशशीर्षारिवन्दिता ॥ १२१ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection. Digitized by Muthulakshmi Research Academy. Funded by IKS-MoE

दशशीर्षारिसुखदा दशशीर्षकपालिनी ।
दशशीर्षज्ञानदात्री दशशीर्षारिदेहिनी ॥ १२२ ॥
दशशीर्षवधोपात्त - श्रीरामचन्द्ररूपता ।
दशशीर्षराष्ट्रदेवी दशशीर्षारिसारिणी ॥ १२३ ॥
दशशीर्षभ्रातृतुष्टा दशशीर्षवधूप्रिया ।
दशशीर्षवधूप्राणा दशशीर्षवधूरता ॥ १२४ ॥
दैत्यगुरुता साध्वी दैत्यगुरुप्रपूजिता ।
दैत्यगुरूपदेष्ट्री च दैत्यगुरुनिषेविता ॥ १२५ ॥
दैत्यगुरुमतप्राणा दैत्यगुरुतपाशिनी ।
दुरन्तदुःखशमनी दुरन्तदमनी तमी ॥ १२६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दुरन्तशोकशमनी दुरन्तरोगनाशिनी ।
दुरन्तवैरिदमनी दुरन्तदैत्यनाशिनी ॥ १२७ ॥
दुरन्तकलुषघ्नी च दुष्कृतिस्तोमनाशिनी ।
दुराशया दुराधारा दुर्जया दुष्टकामिनी ॥ १२८ ॥
दर्शनीया च दृश्या चाऽदृश्या च दृष्टिगोचरा ।
दूतीयागप्रिया दूती दूतीयागकरप्रिया ॥ १२९ ॥
दूतीयागकरानन्दा दूतीयागसुखप्रदा ।
दूतीयागकरायाता दूतीयागप्रमोदिनी ॥ १३० ॥
दुर्वासःपूजिता चैव दुर्वासोमुनिभाविता ।
दुर्वासोऽर्चितपादा च दुर्वासो मौनभाविता ॥ १३१ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi. Muthulakshmi Research Academy. Funded by IKS-MoE

दुर्वासोमुनिवन्द्या च दुर्वासोमुनिदेवता ।
दुर्वासोमुनिमाता च दुर्वासोमुनिसिद्धिदा ॥ १३२ ॥
दुर्वासोमुनिभावस्था दुर्वासोमुनिसेविता ।
दुर्वासोमुनिचित्तस्था दुर्वासोमुनिमण्डिता ॥ १३३ ॥
दुर्वासोमुनि - सञ्चारा दुर्वासोहृदयङ्गमा ।
दुर्वासोहृदयाराध्या दुर्वासोहृत्सरोजगा ॥ १३४ ॥
दुर्वासस्तापसाराध्या दुर्वासस्तापसाश्रया ।
दुर्वासस्तापसरता दुर्वासस्तापसेश्वरी ॥ १३५ ॥
दुर्वासो मुनिकन्या च दुर्वासोऽद्भुतसिद्धिदा ।
दररात्री दरहरा दरयुक्ता दरापहा ॥ १३६ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection. Digitized by Muthulakshmi Research Academy. Funded by IKS-MoE

दरघ्नी दरहन्त्री च दरयुक्ता दराश्रया ।
दरस्मेरा दरापाङ्गी दयादात्री दयाश्रया ।
दस्रपूज्या दस्रमाता दस्रदेवी दरोन्मदा ॥ १३७ ॥

दस्रसिद्धा दस्रसंस्था दस्रतापविमोचिनी ।
दस्रक्षोभहरा नित्या दस्रलोकगतात्मिका ॥ १३८ ॥

दैत्यगुर्वङ्गनावन्द्यां दैत्यगुर्वङ्गनाप्रिया ।
दैत्यगुर्वङ्गना - सिद्धा दैत्यगुर्वङ्गनोत्सुका ॥ १३९ ॥

दैत्यगुरुप्रियतमा देवगुरुनिषेविता ।
देवगुरुप्रसूरूपा देवगुरुकृतार्हणा ॥ १४० ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

देवगुरुप्रेमयुता देवगुर्वनुमानिता ।
देवगुरुप्रभावज्ञा देवगुरुसुखप्रदा ॥ १४१ ॥
देवगुरुज्ञानदात्री देवगुरुप्रमोदिनी ।
दैत्यस्त्रीगणसम्पूज्या दैत्यस्त्रीगणपूजिता ॥ १४२ ॥
दैत्यस्त्रीगणरूपा च दैत्यस्त्रीचित्तहारिणी ।
देवस्त्रीगणपूज्या च देवस्त्रीगणवन्दिता ॥ १४३ ॥
देवस्त्रीगणचित्तस्था देवस्त्रीगणभूषिता ।
देवस्त्रीगणसंसिद्धा देवस्त्रीगणतोषिता ॥ १४४ ॥
देवस्त्रीगणहस्तस्थ - चारुचामरवीजिता ।
देवस्त्रीगणहस्तस्थ - चारुचामरसेविता ॥ १४५ ॥

CC-0. Dr. Muthulakshmi Research Academy https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

देवाङ्गनाधृतादर्श - दृष्ट्यर्थमुखचन्द्रमा ।
देवाङ्गनोत्सृष्टनाग - वल्लीदलकृतोत्सुका ॥ १४६ ॥
देवस्त्रीगणहस्तस्थ - दीपमालाविलोकना ।
देवस्त्रीगणहस्तस्थ - धूपघ्राणविनोदिनी ॥ १४७ ॥
देवनारीकरगत - वासकासवपायिनी ।
देवनारीकङ्कतिका - कृतकेशनिमार्जना ॥ १४८ ॥
देवनारीसेव्यगात्रा देवनारीकृतोत्सुका ।
देवनारीविरचित - पुष्पमालाविराजिता ॥ १४९ ॥
देवनारीविचित्राङ्गी देवस्त्रीदत्तभोजना ।
देवस्त्रीगणगीता च देवस्त्रीगीतसोत्सुका ॥ १५० ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi. Muthulakshmi Research Academy. Funded by IKS-MoE

देवस्त्रीनृत्यसुखिनी देवस्त्रीनृत्यदर्शिनी ।
देवस्त्रीयोजितलसद् - रत्नपादपदाम्बुजा ॥ १५१ ॥
देवस्त्रीगणविस्तीर्ण - चारुतल्पनिषेदुषी ।
देवनारीचारुकरा - कलितांघ्र्यादिदेहिका ॥ १५२ ॥
देवनारीकरव्यग्र - तालवृन्दमरुत्सुका ।
देवनारीवेणुवीणा - नादसोत्कण्ठमानसा ॥ १५३ ॥
देवकोटिस्तुतिनुता देवकोटिकृतार्हणा ।
देवकोटिगीतगुणा देवकोटिकृतस्तुतिः ॥ १५४ ॥
दन्तदष्ट्योद्वेगफला देवकोलाहलाकुला ।
द्वेषरागपरित्यक्ता द्वेषरागविवर्जिता ॥ १५५ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दामपूज्या दामभूषा दामोदरविलासिनी ।
दामोदरप्रेमरता दामोदरभगिन्यपि ॥ १५६ ॥
दामोदरप्रसूर्दामो - दरपत्नीपतिव्रता ।
दामोदराऽभिन्नदेहा दामोदररतिप्रिया ॥ १५७ ॥
दामोदराभिन्नतनुर्दामोदरकृतास्पदा ।
दामोदरकृतप्राणा दामोदरगतात्मिका ॥ १५८ ॥
दामोदरकौतुकाढ्या दामोदरकलाकला ।
दामोदरालिङ्गिताङ्गी दामोदरकुतूहला ॥ १५९ ॥
दामोदरकृताह्लादा दामोदरसुचुम्बिता ।
दामोदरसुताकृष्टा दामोदरसुखप्रदा ॥ १६० ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दामोदरसहाढ्या च दामोदरसहायिनी ।
दामोदरगुणज्ञा च दामोदरवरप्रदा ॥ १६१ ॥
दामोदरानुकूला च दामोदरनितम्बिनी ।
दामोदरबलक्रीडा - कुशला दर्शनप्रिया ॥ १६२ ॥
दामोदरजलक्रीडा - त्यक्तस्वजनसौहृदा ।
दामोदरलसद्रास - केलिकौतुकिनी तथा ॥ १६३ ॥
दामोदरभ्रातृका च दामोदरपरायणा ।
दामोदरधरा दामोदरवैरविनाशिनी ॥ १६४ ॥
दामोदरोपजाया च दामोदरनिमन्त्रिता ।
[illegible] दामोदरपरालिता ॥ १६५ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS MoE

दामोदरसमाक्रान्ता दामोदरहताशुभा ।
दामोदरोत्सवरता दामोदरोत्सवावहा ॥ १६६ ॥
दामोदरस्तन्यदात्री दामोदरगवेषिता ।
दमयन्तीसिद्धिदात्री दमयन्तीप्रसाधिता ॥ १६७ ॥
दमयन्तीष्टदेवी च दमयन्तीस्वरूपिणी ।
दमयन्तीकृतार्चा च दमनर्षिविभाजिता ॥ १६८ ॥
दमनर्षिप्राणतुल्या दमनर्षिस्वरूपिणी ।
दमनर्षिस्वरूपा च दम्भपूरितविग्रहा ॥ १६९ ॥
दम्भहन्त्री दम्भधात्री दम्भलोकविमोहिनी ।
दम्भशीला दम्भहरा दम्भवत्परिमर्दिनी ॥ १७० ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दम्भरूपा दम्भकरी दम्भसन्तानदारिणी ।
दत्तमोक्षा दत्तधना दत्तारोग्या च दाम्भिका ॥ १७१ ॥
दत्तपुत्रा दत्तदारा दत्तहारा च दारिका ।
दत्तभोगा दत्तशोका दत्तहस्त्यादिवाहना ॥ १७२ ॥
दत्तमतिर्दत्तभार्या दत्तशास्त्रावबोधिका ।
दत्तपाना दत्तदाना दत्तदारिद्र्यनाशिनी ॥ १७३ ॥
दत्तसौधावनीवासा दत्तस्वर्गा च दासदा ।
दास्यतुष्टा दास्यहरा दासदासीशतप्रभा ॥ १७४ ॥
दाररूपा दारवासा दारवासिहृदास्पदा ।
दारवासिजनाराध्या दारवासिजनप्रिया ॥ १७५ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi. Muthulakshmi Academy. Funded by IKS-MoE

दारवासिविनिर्नीता दारवासिसमर्चिता ।
दारवास्याहृतप्राणा दारवास्यरिनाशिनी ॥ १७६ ॥
दारवासिविघ्नहरा दारवासिविमुक्तिदा ।
दाराग्निरूपिणी दारा दारकार्यरिनाशिनी ॥ १७७ ॥
दम्पती दम्पतीष्टा च दम्पतीप्राणरूपिका ।
दम्पतीस्नेहनिरता दाम्पत्यसाधनप्रिया ॥ १७८ ॥
दाम्पत्यसुखसेना च दाम्पत्यसुखदायिनी ।
दम्पत्यचारनिरता दम्पत्यामोदमोदिता ॥ १७९ ॥
दम्पत्यामोदसुखिनी दाम्पत्याह्लादकारिणी ।
दम्पतीष्टपादपद्मा दाम्पत्यप्रेमरूपिणी ॥ १८० ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Muthulakshmi Academy. Funded by IKS-MoE

दाम्पत्यभोगभवना दाडिमीफलभोजिनी ।
दाडिमीफलसन्तुष्टा दाडिमीफलमानसा ॥ १८१ ॥
दाडिमीवृह्यसंस्थाना दाडिमीवृक्षवासिनी ।
दाडिमीवृक्षरूपा च दाडिमीवनवासिनी ॥ १८२ ॥
दाडिमीफलसाम्योरुपयोधरसमन्विता ।
दक्षिणा दक्षिणारूपा दक्षिणारूपधारिणी ॥ १८३ ॥
दक्षकन्या दक्षपुत्री दक्षमाता च दक्षसूः ।
दक्षगोत्रा दक्षसुता दक्षयज्ञविनाशिनी ॥ १८४ ॥
दक्षयज्ञनाशकर्त्री दक्षयज्ञान्तकारिणी ।
दक्षप्रसूतिर्दक्षेज्या दक्षवंशैकपावनी ॥ १८५ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दक्षात्मजा दक्षसूनुर्दक्षजा दक्षजातिका ।
दक्षजन्मा दक्षजनुर्दक्षदेहसमुद्भवा ॥ १८६ ॥
दक्षजनिर्दक्षयाग - ध्वंसिनी दक्षकन्यका ।
दक्षिणाचारनिरता दक्षिणाचारतुष्टिदा ॥ १८७ ॥
दक्षिणाचारसंसिद्धा दक्षिणाचारभाविता ।
दक्षिणाचारसुखिनी दक्षिणाचारसाधिता ॥ १८८ ॥
दक्षिणाचारमोक्षाप्तिर्दक्षिणाचारवन्दिता ।
दक्षिणाचारशरणा दक्षिणाचारहर्षिता ॥ १८९ ॥
द्वारपालप्रिया द्वारवासिनी द्वारसंस्थिता ।
द्वाररूपा द्वारसंस्था द्वारदेशनिवासिनी ॥ १९० ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

द्वारकरी द्वारधात्री दोषमात्रविवर्जिता ।
दोषाकरा दोषहरा दोषराशिविनाशिनी ॥ १९१ ॥
दोषाकरविभूषाढ्या दोषाकरकपालिनी ।
दोषाकरसहस्राभा दोषाकरसमानना ॥ १९२ ॥
दोषाकरमुखी दिव्या दोषाकरकराग्रजा ।
दोषाकरसमज्योतिर्दोषाकरसुशीतला ॥ १९३ ॥
दोषाकरश्रेणी दोषसदृशापाङ्गवीक्षणा ।
दोषाकरेष्टदेवी च दोषाकरनिषेविता ॥ १९४ ॥
दोषाकरप्राणरूपा दोषाकरमरीचिका ।
दोषाकरोल्लसद्भाला दोषाकरसुहर्षिणी ॥ १९५ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS MoE

दोषाकरशिरोभूषा दोषाकरवधूप्रिया ।
दोषाकरवधूप्राणा दोषाकरवधूमता ॥ १९६ ॥
दोषाकरवधूप्रीता दोषाकरवधूरपि ।
दोषापूज्या तथा दोषा - पूजिता दोषहारिणी ॥ १९७ ॥
दोषाजापमहानन्दा दोषाजापपरायणा ।
दोषापुरश्चाररता दोषापूजकपुत्रिणी ॥ १९८ ॥
दोषापूजकवात्सल्य - कारिणी जगदम्बिका ।
दोषापूजकवैरिघ्नी दोषापूजकविघ्नहृत् ॥ १९९ ॥
दोषापूजकसंतुष्टा दोषापूजकमुक्तिदा ।
दम - प्रसूनसंपूज्या दमपुष्पप्रिया सदा ॥ २०० ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दुर्योधनप्रपूज्या च दुःशासनसमर्चिता ।
दण्डपाणिप्रियादण्ड-पाणिमाता दयानिधिः ॥ २०१ ॥
दण्डपाणिसमाराध्या दण्डपाणिप्रपूजिता ।
दण्डपाणिगृहासक्ता दण्डपाणिप्रियंवदा ॥ २०२ ॥
दण्डपाणिप्रियतमा दण्डपाणिमनोहरा ।
दण्डपाणिहृतप्राणा दण्डपाणिसुसिद्धिदा ॥ २०३ ॥
दण्डपाणिपरामृष्टा दण्डपाणिप्रहर्षिता ।
दण्डपाणिविघ्नहरा दण्डपाणिशिरोधृता ॥ २०४ ॥
दण्डपाणिप्राप्तचर्चा दण्डपाण्युन्मुखी सदा ।
दण्डपाणिप्राप्तपदा दण्डपाणिवरोन्मुखी ॥ २०५ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दण्डहस्ता दण्डपाणिर्दण्डबाहुर्दरान्तकृत् ।
दण्डदोष्का दण्डकरा दण्डचित्तकृतास्पदा ॥ २०६ ॥
दण्डिविद्या दण्डिमाता दण्डिखण्डकनाशिनी ।
दण्डिप्रिया दण्डिपूज्या दण्डिसन्तोषदायिनी ॥ २०७ ॥
दस्युपूज्या दस्युरता दस्युद्रविणदायिनी ।
दस्युवर्गकृतार्हा च दस्युवर्गविनाशिनी ॥ २०८ ॥
दस्युनिर्णाशिनी दस्यु-कुलनिर्णाशिनी तथा ।
दस्युप्रियकरी दस्युनृत्यदर्शनतत्परा ॥ २०९ ॥
दुष्टदण्डकरी दुष्टवर्गविद्राविणी तथा ।
दुष्टवर्गनिग्रहार्हा दुष्कप्राणनाशिनी ॥ २१० ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दूषकोत्तापजननी दूषकारिष्टकारिणी ।
दूषकद्वेषणकरी दाहिका दहनात्मिका ॥ २११ ॥
दारुकारिनिहन्त्री च दारुकेश्वरपूजिता ।
दारुकेश्वरमाता च दारुकेश्वरवन्दिता ॥ २१२ ॥
दर्भहस्ता दर्भयुता दर्भकर्मविवर्जिता ।
दर्भमयीदर्भतनुर्दर्भसर्वस्वरूपिणी ॥ २१३ ॥
दर्भकर्मा चारुरता दर्भहस्तकृतार्हणा ।
दर्भानुकूला दाम्भर्या दर्वीपात्रानुदामिनी ॥ २१४ ॥
दमघोषप्रपूज्या च दमघोषवरप्रदा ।
दमघोषसमाराध्या दावाग्निरूपिणी तथा ॥ २१५ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दावाग्निरूपा दावाग्निनिर्णाशितमहाबला ।
दन्तदंष्ट्रासुरकला दन्तचर्चितहस्तिका ॥ २१६ ॥
दन्तदंष्ट्रस्यन्दना च दन्तनिर्णाशितासुरा ।
दधिपूज्या दधिप्रीता दधीचिवरदायिनी ॥ २१७ ॥
दधीचीष्टदेवता च दधीचिमोक्षदायिनी ।
दधीचिर्दैन्यहन्त्री च दधीचिदरदारिणी ॥ २१८ ॥
दधीचिभक्तिसुखिनी दधीचिमुनिसेविता ।
दधीचिज्ञानदात्री च दधीचिगुणदायिनी ॥ २१९ ॥
दधीचिकुलसंभूषा दधीचिभुक्तिमुक्तिदा ।
दधीचिकुलदेवी च दधीचिकुलदेवता ॥ २२० ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

दधीचिकुलगम्या च दधीचिकुलपूजिता ।
दधीचिसुखदात्री च दधीचिदैन्यहारिणी ॥ २२१ ॥
दधीचिदुःखहन्त्री च दधीचिकुलसुन्दरी ।
दधीचिकुलसंभूता दधीचिकुलपालिनी ॥ २२२ ॥
दधीचिदानगम्या च दधीचिदानमानिनी ।
दधीचिदानसन्तुष्टा दधीचिदानदेवता ॥ २२३ ॥
दधीचिजयसम्प्रीता दधीचिजपमानसा ।
दधीचिजपपूजाढ्या दधीचिजपमालिका ॥ २२४ ॥
दधीचिजपसन्तुष्टा दधीचिजपतोषिणी ।
दधीचितपसाराध्या दधीचिसुखदायिनी ॥ २२५ ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Dr. Muthulakshmi Research Academy. Funded by IKS-MoE

दूर्वा दूर्वादलश्यामा दूर्वादलसमद्युतिः ।
नाम्नां सहस्रं दुर्गाया दादीनामिति कीर्तितम् ॥ २२६ ॥
यः पठेत् साधकाधीशः सर्वसिद्धिर्लभेत्तु सः ।
प्रातर्मध्याह्नकाले च सन्ध्यायां नियतः शुचिः ॥ २२७ ॥
तथाऽर्धरात्रसमये स महेश इवापरः ।
शक्तियुक्तो महारात्रौ महावीरः प्रपूजयेत् ॥ २२८ ॥
महादेवीं मकाराद्यैः पञ्चभिर्द्रव्यसत्तमैः ।
यः सम्पठेत् स्तुतिमिमां स च सिद्धिस्वरूपधृक् ॥ २२९ ॥
देवालये श्मशाने च गङ्गातीरे निजे गृहे ।
वाराङ्गनागृहे चैव श्रीगुरोः सन्निधावपि ॥ २३० ॥

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

पर्वते प्रान्तरे घोरे स्तोत्रमेतत् सदा पठेत् ।
दुर्गानामसहस्रं हि दुर्गां पश्यति चक्षुषा ॥ २३१ ॥
शतावर्तनमेतस्य पुरश्चरणमुच्यते ।
स्तुतिसारो निगदितः किं भूयः श्रोतुमिच्छसि ॥ २३२ ॥

इति कुलार्णवतन्त्रोक्तं दकारादि-दुर्गासहस्रनामस्तोत्रं समाप्तम् ।

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

अथ दकारादि-दुर्गासहस्रनामावलिः

ॐ दुं दुर्गायै नमः
ॐ दुर्गतिहरायै नमः
ॐ दुर्गाचलनिवासिन्यै नमः
ॐ दुर्गमार्गानुसञ्चारायै नमः
ॐ दुर्गमार्गनिवासिन्यै नमः
ॐ दुर्गमार्गप्रविष्टायै नमः
ॐ दुर्गमार्गप्रवेशिन्यै नमः
ॐ दुर्गमार्गकृतावासायै नमः
ॐ दुर्गमार्गजयप्रियायै नमः
ॐ दुर्गमार्गगृहीतार्चायै नमः
ॐ दुर्गमार्गस्थितात्मिकायै नमः
ॐ दुर्गमार्गस्तुतिपरायै नमः
ॐ दुर्गमार्गस्मृतिपरायै नमः
ॐ दुर्गमार्गसदास्थाल्यै नमः

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

ॐ दुर्गमार्गरतिप्रियायै नमः
ॐ दुर्गमार्गस्थलस्थानायै नमः
ॐ दुर्गमार्गविलासिन्यै नमः
ॐ दुर्गमार्गत्यक्तवस्त्रायै नमः
ॐ दुर्गमार्गप्रवर्तिन्यै नमः
ॐ दुर्गासुरनिहन्त्र्यै नमः ॥२०॥
ॐ दुर्गासुरनिषूदिन्यै नमः
ॐ दुर्गासुरहरायै नमः
ॐ दूत्यै नमः
ॐ दुर्गासुरविनाशिन्यै नमः
ॐ दुर्गासुरवधोन्मत्तायै नमः
ॐ दुर्गासुरवधोत्साहायै नमः
ॐ दुर्गासुरवधोद्यतायै नमः
ॐ दुर्गासुरवधप्रेप्सवे नमः
ॐ दुर्गासुरमखान्तकृते नमः ३०
ॐ दुर्गासुरध्वंसतोषायै नमः
ॐ दुर्गदानवदारिण्यै नमः
ॐ दुर्गविद्रावणकर्यै नमः
ॐ दुर्गविद्राविण्यै नमः
ॐ दुर्गविक्षोभणकर्यै नमः

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

ॐ दुर्गशीर्षनिकृन्तिन्यै नमः
ॐ दुर्गविध्वंसनकर्यै नमः
ॐ दुर्गदैत्यनिकृन्तिन्यै नमः
ॐ दुर्गदैत्यप्राणहरायै नमः
ॐ दुर्गदैत्यान्तकारिण्यै नमः ४०
ॐ दुर्गदैत्यहरत्रात्रे नमः
ॐ दुर्गदैत्यासृगुन्मदायै नमः
ॐ दुर्गदैत्याशनकर्यै नमः
ॐ दुर्गचर्माम्बरावृतायै नमः
ॐ दुर्गयुद्धोत्सवकर्यै नमः
ॐ दुर्गयुद्धविशारदायै नमः
ॐ दुर्गयुद्धासवरतायै नमः
ॐ दुर्गयुद्धविमर्दिन्यै नमः
ॐ दुर्गयुद्धहास्यरतायै नमः
ॐ दुर्गयुद्धाट्टहासिन्यै नमः ५०
ॐ दुर्गयुद्धमहामत्तायै नमः
ॐ दुर्गयुद्धानुसारिण्यै नमः
ॐ दुर्गयुद्धोत्सवोत्साहायै नमः
ॐ दुर्गदेशनिषेविण्यै नमः
ॐ दुर्गदेशवासरतायै नमः

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

ॐ दुर्गदेशविलासिन्यै नमः
ॐ दुर्गदेशार्चनरतायै नमः
ॐ दुर्गदेशजनप्रियायै नमः
ॐ दुर्गमस्थानसंस्थानायै नमः
ॐ दुर्गमध्यानुसाधनायै नमः
ॐ दुर्गमान्यै नमः
ॐ दुर्गमध्यानायै नमः
ॐ दुर्गमात्मस्वरूपिण्यै नमः
ॐ दुर्गमागमसन्धानायै नमः
ॐ दुर्गमागमसंस्तुतायै नमः
ॐ दुर्गमागमदुर्ज्ञेयायै नमः
ॐ दुर्गमश्रुतिसम्मतायै नमः
ॐ दुर्गमश्रुतिमान्यायै नमः
ॐ दुर्गमश्रुतिपूजितायै नमः
ॐ दुर्गमश्रुतिसुप्रीतायै नमः ७०
ॐ दुर्गमश्रुतिहर्षदायै नमः
ॐ दुर्गमश्रुतिसंस्थानायै नमः
ॐ दुर्गमश्रुतिमानितायै नमः
ॐ दुर्गमाचारसन्तुष्टायै नमः
ॐ दुर्गमाचारतोषितायै नमः

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

ॐ दुर्गमाचारनिर्वृत्तायै नमः
ॐ दुर्गमाचारपूजितायै नमः
ॐ दुर्गमाचारवशितायै नमः
ॐ दुर्गमस्थानदायिन्यै नमः
ॐ दुर्गमप्रेमनिरतायै नमः ॥८०॥
ॐ दुर्गमद्रविणप्रदायै नमः
ॐ दुर्गमाम्बुजमध्यस्थायै नमः
ॐ दुर्गमाम्बुजवासिन्यै नमः
ॐ दुर्गनाडीमार्गगत्यै नमः
ॐ दुर्गनाडीप्रचारिण्यै नमः
ॐ दुर्गनाडीपद्मरतायै नमः
ॐ दुर्गनाड्यम्बुजस्थितायै नमः
ॐ दुर्गनाडीगतायातायै नमः
ॐ दुर्गनाडीकृतास्पदायै नमः
ॐ दुर्गनाडीरतरतायै नमः ९०
ॐ दुर्गनाडीशसंस्तुतायै नमः
ॐ दुर्गनाडीश्वररतायै नमः
ॐ दुर्गनाडीशचुम्बितायै नमः
ॐ दुर्गनाडीशक्रोडस्थायै नमः
ॐ दुर्गनाड्युत्थितोत्सुकायै नमः

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

ॐ दुर्गनाड्यारोहणायै नमः
ॐ दुर्गनाडीनिषेवितायै नमः
ॐ दरिस्थानायै नमः
ॐ दरिस्थानवासिन्यै नमः
ॐ दनुजान्तकृते नमः १००
ॐ दरीकृततपस्यायै नमः
ॐ दरीकृतहरार्चनायै नमः
ॐ दरीजापितदिष्टायै नमः
ॐ दरीकृतरतिक्रियायै नमः
ॐ दरीकृतहरार्चायै नमः

ॐ दरीक्रीडितपुत्रिकायै नमः
ॐ दरीसन्दर्शनरतायै नमः
ॐ दरीरोदितवृश्चिकायै नमः
ॐ दरीगुप्तिकौतुकाढ्यायै नमः
ॐ दरीभ्रमणतत्परायै नमः ११०
ॐ दनुजान्तकर्यै नमः
ॐ दीनायै नमः
ॐ दनुसन्तानदारिण्यै नमः
ॐ दनुजध्वंसिन्यै नमः
ॐ दनायै नमः

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi. Muthulakshmi Research Academy. Funded by IKS, MoE

ॐ दनुजेन्द्रविनाशिन्यै नमः
ॐ दानवध्वंसिन्यै नमः
ॐ देव्यै नमः
ॐ दानवानां भयङ्कर्यै नमः
ॐ दानव्यै नमः १२०
ॐ दानवाराध्यायै नमः
ॐ दानवेन्द्रवरप्रदायै नमः
ॐ दानवेन्द्रनिहन्त्र्यै नमः
ॐ दानवद्वेषिणीसत्यै नमः
ॐ दानवारिप्रेमरतायै नमः
ॐ दानवारिप्रपूजितायै नमः
ॐ दानवारिकृतार्चायै नमः
ॐ दानवारिविभूतिदायै नमः
ॐ दानवारिमहानन्दायै नमः
ॐ दानवारिरतिप्रियायै नमः
ॐ दानवारिदानरतायै नमः
ॐ दानवारिकृतास्पदायै नमः
ॐ दानवारिस्तुतिरतायै नमः
ॐ दानवारिस्मृतिप्रियायै नमः
ॐ दानवार्याहाररतायै नमः

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi. Muthulakshmi Research Academy. Funded by IKS-MoE

ॐ दानवारिप्रबोधिन्यै नमः
ॐ दानवारिधृतप्रेमायै नमः
ॐ दुःखशोकविमोचिन्यै नमः
ॐ दुःखहन्त्र्यै नमः
ॐ दुःखदात्र्यै नमः १४०
ॐ दुःखनिर्मूलकारिण्यै नमः
ॐ दुःखनिर्मूलनकर्यै नमः
ॐ दुःखदार्यरिनाशिन्यै नमः
ॐ दुःखहरायै नमः
ॐ दुःखनाशायै नमः
ॐ दुःखग्रामायै नमः
ॐ दुरासदायै नमः
ॐ दुःखहीनायै नमः
ॐ दुःखधारायै नमः
ॐ द्रविणाचारदायिन्यै नमः
ॐ द्रविणोत्सर्गसन्तुष्टायै नमः
ॐ द्रविणत्यागतोषिकायै नमः
ॐ द्रविणस्पर्शसन्तुष्टायै नमः
ॐ द्रविणस्पर्शमानदायै नमः
ॐ द्रविणस्पर्शहर्षाढ्यायै नमः

Public Domain. https://archive.org/details/muthulakshmiacademy

Giti Thadani Collection, Delhi Muthulakshmi Research Academy. Funded by IKS-MoE

ॐ द्रविणस्पर्शतुष्टिदायै नमः
ॐ द्रविणस्पर्शनकर्यै नमः
ॐ द्रविणस्पर्शनातुरायै नमः
ॐ द्रविणस्पर्शनोत्साहायै नमः
ॐ द्रविणस्पर्शसाधितायै नमः
ॐ द्रविणस्पर्शनमतायै नमः
ॐ द्रविणस्पर्शपुत्रिकायै नमः
ॐ द्रविणस्पर्शरक्षिण्यै नमः
ॐ द्रविणस्तोमदायिन्यै नमः
ॐ द्रविणाकर्षणकर्यै नमः १६५
ॐ द्रविणौघविसर्जिन्यै नमः
